International Journal of Applied Research 2017; 3(8): 626-627




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2017; 3(8): 626-627
www.allresearchjournal.com
Received: 11-06-2017
Accepted: 14-07-2017

**अमरेश कुमार अमर**
शोधार्थी, साहित्य विभाग,
कामेश्वरसिंह संस्कृत
विश्वविद्यालय, दरभंगा,
बिहार, भारत

**Corresponding Author:**
**अमरेश कुमार अमर**
शोधार्थी, साहित्य विभाग,
कामेश्वरसिंह संस्कृत
विश्वविद्यालय, दरभंगा,
बिहार, भारत

# नाट्यशास्त्रे रसविमर्शः/उत्त्पति

**अमरेश कुमार अमर**

**प्रस्तावनाः**
'वाक्यं रसात्मकं काव्यम्' अर्थात् रस एव आत्मा साररूपतया जीवनाधायको यस्य तत् रसात्मकं वाक्यं काव्यमिति मौलार्थः तस्यायं विशदाशयः– 'वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्' इति काव्यविषयकाग्नेयपुरणवचनप्रामाण्येन ध्वनिभूतो रस एव वस्तुतः काव्यस्यात्मा स्वरूपानाध्याकत्वात्। तदुक्तं– 'काव्यस्य शब्दार्थं शरीरं, रसादिश्चात्मा, गुणाः शौर्यादिवत्, दोषाः काणत्वचखञ्जत्वादिवत्, रीतयोऽवयवसंस्थानविशेषवत्, अलौराः कटककुण्डलादिवत्' इति तथा च काव्येन रसादिप्रकाशनमेव

कवेर्मुख्योद्देश्यमिति सारम्। तदुक्तं ध्वन्यालोके–
'व्यत्र्यव्यञ्जकभावेऽस्मिन् विविधे सम्भवत्यपि।
रसादिभय एकस्मिन् कविः स्यादवधानवान्'[1]।।

अर्थात् काव्यार्थानां व्यत्र्यवस्त्वलंकाररसादिभेदेन व्यञ्जकभेदेन च आनन्त्ये सम्भवत्यपि, एकस्मिन् परमाभीष्टसम्पादकतया प्रधानतमे रसादिमये–रसादिरूपे तत्प्रचुरे वा व्यत्र्यव्यञ्जकभावे कविविशेष–रूपेणावदधीतेति भावः। चिरन्तनैरपि भरतादिकविभिः– ' काव्यस्य प्रयोजनं हि रसास्वादसुखपरम्परा प्रापणद्वारा वेदादिशास्त्रविमुखानां सुकुमारमतीनां राजकुमाराणां विनेयानां रामादिवत् प्रवर्त्तितव्यम, न रावणादिव– दित्यादिकृत्याकृत्यप्रवृत्तिनिवृत्युपदेश' इति रीत्या काव्यप्रयोजनं प्रतिपादयद्भिः साक्षात् रसवत एव काव्यत्वात्रि कारात्। अत एवानन्दवर्द्धनाचार्येण ध्वन्यालोके प्रत्यपादि 'कथाशरीरमुत्पाद्य वस्तुकार्य तथा। यथा रसमयं सर्वमेवैतत् प्रतिभासते। किञ्च 'सन्ति सिद्धरसप्रख्या ये च रामायणादयः कथाऽऽश्रया न तैर्योज्या स्वच्छा रसविरोधिना' इति। एवञ्च सरसकाव्यनिर्माणे एवोक्ताचार्यस्य हार्दभावो व्यज्यते। अतएव च पण्डितराजजगन्नाथेन रसध्वेनरूतमोत्तमरूपतां प्रतिपाद्य रसस्य सफलसत्काव्योपनिषद्भूतत्वमभिहितम्। रसपदेनात्र रस्यते आस्वाद्यते इति रस इति व्युत्पत्त्या रसाभासभावादयोऽपि गृह्यन्ते। तथा च भावादीनामपि रस्यमानतादशायामास्वादविषयतया तत्प्रधानकाव्यानमपि तत्त्वमव्याहतम् तथा चाखण्डास्वादविशेषविषयत्वरूपमेव भावादिसाधारणं रसत्वं रसात्मवादिनामभिप्रेतमिति भावः। रसपदार्थश्चावारणभत्रवच्छिन्नरत्याद्यवन्छिन्न– चिदाननन्दचमत्काररूपी बोध्यः। एतादृशरसस्यानन्दसान्द्रत्वेन श्रेष्ठरूपतया काव्यस्योपादेयताप्रयोजकत्वेन तस्य काव्यात्मत्वप्रतिपादनं कविवरविश्वनाथस्य समीचीनं प्रतिभाति। नचोक्तव्युत्पत्त्या रससध्रीचीनभावादेः सत्र्हेऽपि रसाद्यसौर्णवस्तवलंकारध्वनेः काव्यप्रकारमध्ये निर्वचनयोन्मत्तप्रलपितत्व प्रसत्र इति वाच्यम् ? वस्त्वलौरध्वन्योः काव्यात्मभवविरहेऽपि काव्यप्रभेदकथनप्रकरेण तयोरूपादानस्य रसोदेरुत्कर्षत्वेन काव्यभेदकत्वात्। अतएव व्यक्तिविवेकेऽव्युक्तम्– 'काव्यस्यात्मनि सत्रिनि रसादिरूपे न कस्यचिद् विमति' रिति। नव रसादिमत्त्वस्यैव काव्यत्वे प्रबन्धान्तर्वतिनां केषाञ्चित् नीरसानां पद्यानां काव्यत्वं न स्यादिति वाच्यम् ? सरसपद्यान्तर्वतिनीरसपदानां तत्पद्यरसेनेव तेषामपि प्रबन्धरसेनैव रसवत्तायाः स्वीकारात्। तदुक्तं–'एकावयवसंस्थेन भूषणेनेव कामिनी। पदद्योत्येन सुकवेर्ध्वनिना भाति भारती।' अतएव सरसकाव्यनिर्माणनैव कवेरव्यामलाभी भवति नान्यथा। तस्मात् प्रबन्धमुपनिबन्ध्नता कविना सर्वात्मना रसपरतंत्रेण भवितव्यम्। तत्र प्राक्तनेतिवृत्ते यदि रसाननुगुणां स्थिति पश्येत् तदा तां भौक्त्वाऽपि स्वतन्त्रतया रसानुगुणं कथान्तरमुत्पादयेत् यतो हि नहि केवलं कवेरितिवृत्तमात्रवर्णनेन किमपि प्रयोजनं सम्पद्यते, इतिहासादेव तत्सिद्धेः अर्थात् कवेः काव्यनिर्माणस्य महाकवि त्वपदवीलाभः, सहृदयाह्णादनपुरस्सरं सदुपदेशश्चेत्येतदुभयमेव फलं, तच्च रससन्निवेशमन्तरेण सर्वथा दुरासदेव। तदुक्तं ध्वन्यालोके– 'मुख्या व्यापार विषयाः सत्कवीनां रसादयः। तेषां निबन्धने भाव्यं तैः सदैवाप्रमादिभिः। नीरसन्तु प्रबन्धे यः सोऽपशब्दो महान् कवेः। स तेनाकविरेव स्यादन्येनास्मृतलक्षणः' इति[2]।

हरिनारायणदीक्षित विरचितेऽस्मिन् नकाविश्वामित्रनाटकस्य चतुर्थोऽपि नाटयकीयविषयानुगुण्यवर्णनमस्ति। ततो मञ्चाग्रभागे तापसवेषी उभौ किशोरौ परस्परं वार्तालापं कुर्वन्तौ प्रविशतः[3]।

प्रथमः– सखे! बलव्रत । समिदाहरणाय अद्य कस्यां दिशि यास्यसि?
बलव्रतः – आर्य ! देवल! अधुनावधि अनिश्चितमेवं
देवलः– सखे! सखेदो दृश्यसे; अस्याः खिन्नतायाः किं कारणम् ?
बलव्रतः– किं कथयानि आर्य! छिन्ना ममाशालता।
देवलः – कथय बन्धो! कथमेषा निराशा?
बलव्रतः– भवांस्तु जानीते एव यद् बलातिबलाख्ये विद्ये समधिगन्तुम् अहं महर्षिविश्वामित्रस्य अन्तेवासित्वमत्रैकृतवानस्मि।
देवलः– आम्। इदन्तु समीचीनमेव। गुरूदेव एव पुरुषार्थचतुष्टदायिकयोः सव्रभ्रमोपनाशिकयोश्चानयोरूभयोरेव विद्ययोः मर्मज्ञो महर्षिरस्ति[4]।
बलव्रतः – इदमेव ज्ञात्वा तु अहमत्र समागतवानस्मि।
देवलः– इदमहं वेद्भि। अग्रे कथय किं जातम् ?
बलव्रतः– अद्य गुरूदेवेन कथिमस्ति यत् 'बलव्रत'! सम्प्रति एनद्विद्याद्वयस्य ग्रहणे त्वयि पात्रतां न पश्यामि। अतस्त्वं परित्यज्य तद्विषयिणीं प्राप्तिकामनां यथेच्छं गन्तुमर्हसि' इति। अतएव कथयामि तात! यत् छिन्ना ममाशालतेति।
देवलः – (सोच्छ्वासम्)– इदं तु वास्तवं दुःखम्। उभौ मौनं गतिं नाटयतः–
बलव्रतः– अथ भवानेव उपदिशतु, मया किं करणीयम्।
देवलः (विचिन्त्य) – बलव्रत! गुरुदेवो न स्वप्नेऽपि मिथ्या वदति। अतस्तद्वचसि विकल्पं न विधाय त्वया तद्विषयिणी पात्रता एव अर्जनीया।
बलव्रतः– (संभ्रू संकोचम्) – नहि आर्य देवल! इदमित्थं नास्ति।
देवलः – तर्हि किमस्ति।
बलव्रतः– भवान् अवधानं न ददाति; किन्तु अहं सर्व ज्ञातवानस्मि।
देवलः – (सावेगम्) – किं ज्ञातवानसि द्य
बलव्रत :– इदमेव यद्, यतः प्रभृति सा मेनकानाम्नी युवतिरत्र समायातास्ति, ततः प्रभृत्येव गृरूदेवो ममोपेक्षां करोति।
देवलः– अयं ते भ्रमः। मम मनसि तु कदाचिदपि इयमनुभूतिर्नाभवत्।
बलव्रतः– (ईषद् विहस्य) – आर्य ! भवान् ऋजुमनाः अस्ति; अतएव।
देवलः– (साक्षेपम्) – तर्हि इमामनुभूतिं कर्त्तुम् अहं कुटिलो न बुभूषामि (सहगमनाद् विरमति)।
बलव्रतः – (सानुनयम्) – आये ! भवांस्तु मधैव मयि प्रकुपितो जातः।
देवलः – अकारणो नायं मम कोपः।
बलव्रतः – वाढम्। किन्तु भवानपि तु विचारयतु; तया समागतया एव इदं तपोवनं परिष्कृत्य उपवनीकृतम्; महर्षि विश्वामित्रं परित एव अहर्निशं सेवमाना सा बसति; तस्मै भोजनमपि स्वयं निर्माय समर्पयति; प्रातः सायं भ्रमणविधावपि सा तेनैव सह भवतिद्ध सदैव सा महर्षि छायेव समुनुसरति। महर्षिरपि तामेव स्वतपः सिद्धिमिव मन्यमानो मां निरीक्ष्यापि न निरीक्षते; मया किमपि पृष्टोऽपि च न मां बहु बोधयति।
श्लेषविचारः – अथ श्लेषनामशब्दालंकारविषयो विविच्यते– अर्थभेदेन विभिन्नतया प्रतीयमानाः शब्दा युगपदेकोच्चारणविषयाः सन्तो यत् श्लिष्यन्ति एकारूपतयेव भासन्ते स श्लेषनामा शब्दालौरः। एवञ्चैकप्रयत्नोचार्यतयाऽभिन्नत्वेनानुभूयमानशब्दत्वमेव श्लेष इति फलितम्[5]। तदुक्तं– 'वाच्यभेदेन भिन्ना यद् युगपद् भाषणस्पृशः। श्लिष्यन्ति शब्दाः श्लेषोऽसावक्षरादिभिरष्टधा स द्विविधः सभत्रेऽभत्रश्च। तत्र सभत्रश्लेषश्चैकविध एव। तदाह– 'भेदाभावात् प्रगकृत्यादेर्भेदोऽपि नवमो भवेत्'। तस्य चाभञ्श्लेषस्यालौरसर्वस्वकारादिभिरर्थालौरमध्ये गणितत्वेन कथं शब्दालौरत्वमिति न शौयम्। अलंकाराणां शब्दार्थगतत्वेऽन्वयव्यतिरेकयोरेव नियामकतया स्वयं च पल्वाताम्रभास्वत्कारविराजिता। प्रभातसन्ध्वे वास्वापफललुब्धे हितप्रदा।' इत्यादौ परार्धेसभञ्श्लेषवत् पूर्वार्धेऽपि करादिशब्देषु अभञ्श्लेषस्य सत्त्वेन। तेषाञ्च पर्यायपरिवृत्तिहसत्वाभावेन तत्सत्त्वे श्लेषस्य शब्दालंकारत्वसिद्धेः अर्थश्लेषस्य स विषयः, यत्र शब्दपरिवर्तनेऽपि न श्लेषत्वखण्डना। यथा– 'स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम्। अहो सुसदृशी वृत्तिस्तुलाकोटेः खलस्य च' इत्यादौ स्तोकादिशब्दपरिवर्तनेऽपि न श्लेषत्वभञ्नप्रसत्रे भवति[6]।
तद्यथा– शनैः शनैः जवनिका अपसरति; देवेन्द्रभवनोपमे रञ्मञ्चे पारितजातपुष्पमाणिः दिव्यासनासीनो विचारमग्नो देवराजो दृश्यते; क्षणानन्तरं च प्रतीहारी प्रविशति।
प्रतीतारीः– (अभिवादयन्ती– देवाधिदेव ! भवन्तं दिदृक्षवो वायुमधु–कामदेवाः द्वारि समायाताः सन्ति। तेभ्यो भावत्कीकाङ्क्षास्ति?
देवराज :– (श्रुत्वैव प्रतीहारीं विलोकयन्) – किम् ?
प्रताहारीः (साञ्जलिः) – वायु–मधु–कामदेवाः समायाताः सन्ति। तीयो भावत्की काङ्क्षास्ति ?
देवराजः – (श्रुत्वा सहर्षम्) – प्रतीहार! त्वरितं तान् प्रवेशय।
प्रतीहारी – (साञ्जलिः सशिरोनतिश्च)– यदाज्ञापयति देवराजः। (प्रतीहारी निष्क्राम्यति; ततः प्रविशन्ति वायु–मधु–कामाः।)
त्रय एवः – (साञ्जलयः) – जयतु जयतु देवराजः।
देवराजः– (सहर्षम् उत्थाय) – आयान्तु; आयान्तु; मम विपदि सुहृदः आयान्तु। (आसनानि निर्दिशति; सर्वे यथास्थानं तिष्ठन्तिः देवाराजस्तांस्त्रीनेव दृष्ट्वा सचिन्तो भूत्वा पृच्छति)– भवन्तो भूतलात् कदा समायाताः ? मेनका च क्वास्ति ? अपि सर्व कुशलम् ?
वासुदेवः – (सस्मितम्) – देवराज ! मेनकाप्रेषिताः कुशलिदानो वयं सम्प्राप्यैव समायाताः स्मः।
देवराजः– (अधीरातपूर्वकम्) – मेनका च कीदृशी ?
कामदेवः– (सस्मितम्) – सा कुशलिनी वर्तते देवराज!
देवराजः– (सोच्छ्वासम्) – हन्त्! परिजनापघातपापाद् अघुनाविधि तु सुरक्षितोऽस्मि। (ईषद् विचिन्त्य) अथ कथय सखे! साफल्याशा वर्तते न वा ?
वायुदेवः – (सस्मितम्) – देवराज! सर्व सम्पन्नं जानातु भवान्।
देवराजः– (सावेगम्) – विशदं ब्रवीतु वायो!
वायुदेवः– (सस्मितम्) – विशदं ब्रवीतु वायो!
वायुदेवः– (सस्मितम्) – अद्यत्वे मेनका निर्विघ्नविहाराय परित्यक्तनिजाश्रमेण विश्वामित्रेण सह सानन्दं सहचरी भूत्वा हिमगिरिरम्यप्रदेशे अनारतं भ्रममाणा प्रविशतिद्ध दिवानिशं च तं सर्वात्मना सेवामानास्ति। विश्वामित्रोऽपि च तस्यां परमां प्रीतिमादधानोऽस्ति।
मधुः– (सस्मितम्) – आं देवराज! यत्तयोरियं नास्ति संज्ञयापन्नम्। अहमत्र प्रमाणम्!।
देवराजः– (सहर्षम्) – सुहृदः! यद्येवं तर्हि तु अहं कृतार्थे जातः (साञ्जलिः) भवतां सर्वेषां कृतज्ञतां सदाहं धारयिष्यामि[7]।
त्रय एव– (साञ्जलयः) – नहि, नहि देवराज! कृतज्ञताप्रदर्शनस्य न कापि आवश्यकता। यदस्माभिः कृतम्, तत्तु अस्माकं कर्त्तव्यजातमेवासीत्।

## सन्दर्भ ग्रंथ सूची


1. ध्वान्यालेके।
2. पाणिनीयशिक्षायाम्।
3. निरूक्ते 7/3/12।
4. तत्रैव उद्धृतम्।
5. उणादि सूत्रम् 4/218।
6. छन्दास्यनन्तस्य शिरो गृणान्ति 2/1/31।
7. काव्यदर्शे, प्रथमपरिच्छेदे।